IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# साहित्याकादम्या बालसाहित्यपुरस्कारसम्मानितसंस्कृतकवीनांपरिचितिः

बबली कुमारी, साहित्यविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः

**(वर्ष2010तः 2023पर्यन्तम् )**

साहित्याकादमी , भारतसर्वकारस्य एका स्वायत्ता संस्था वर्तते, या प्रतिवर्षं भारतीयभाषासु उत्कृष्टसाहित्यिकयोगदानार्थं विविधान् पुरस्कारान् प्रयच्छति, येषु साहित्य-अकादेमीपुरस्कारः, अनुवादपुरस्कारः, युवपुरस्कारः, भाषासम्मानः बालसाहित्यपुरस्कारः च सन्ति। बालसाहित्यपुरस्कारः २०१०तमे वर्षे आरब्धः, यस्य उद्देश्यं बालमनोविज्ञानानुकूलानां शिक्षाप्रदरचनानां च निर्माणं कुर्वताम् साहित्यकाराणां प्रोत्साहनम् अस्ति। संस्कृतभाषा, या भारतस्य समृद्धस्य सांस्कृतिकन्यासस्य वाहिका वर्तते, तत्रापि अनेकैः विद्वद्भिः बालसाहित्यक्षेत्रे उल्लेखनीयं कार्यं कृतम्।

**कूटशब्दा :**साहित्य-अकादमी,बालसाहित्यपुरस्कारः, संस्कृतसाहित्यम्, बालकविता, नीतिकथा, आधुनिकसंस्कृतलेखनम्।

साहित्याकादमी १९५४तमे वर्षे भारतसर्वकारेण स्थापिता आसीत, यस्याः मुख्यालयः नवदेहल्यां स्थितः अस्ति। इयं संस्था भारतस्य संवैधानिकरूपेण मान्यताप्राप्तानां द्वाविंशतेः(२२) भाषाणां तत्सहितम् आङ्ग्लभषां राजस्थानीभाषां च मेलयित्वा साकल्येन चतुर्विंशतेः(२४) भाषासु साहित्यिकोत्कृष्टतायाः मान्यतां प्रयच्छति। संस्कृतभाषा, या वैदिककालात आरभ्य आधुनिकयुगं यावत् भारतीयज्ञानपरम्परायाः मूलाधारशिला अस्ति, साऽपि अस्याः मान्यतासूच्याः अन्तर्गता कृता वर्तते। साहित्य- अकादम्याः उद्देश्यं केवलं पुरस्कारवितरणपर्यन्तमेव सीमितं नास्ति, अपितु इयं संस्था भाषाविकासे, अनुवादकार्ये, संगोष्ठीनाम् आयोजने, पत्रिकाणां प्रकाशने, शब्दकोशनिर्माणे, साहित्यिकन्यासस्य संरक्षणे चेयंबहुविधायामकार्येषु निरन्तरं संलग्ना वर्तते।बालसाहित्यं नाम सा विधा, या बालकानां मानसिकभावनात्मिकां नैतिकीं च वृद्धिम् अवधार्य सरलया रोचकया संस्कारक्षमया च भाषया रच्यते। विश्वसाहित्ये बलसाहित्यस्य परम्परा अतिप्राचीना वर्तते, किन्तु संस्कृते इयं परम्परा विशेषरूपेण समृद्धा प्रभावशालिनी च आसीत्। पञ्चतन्त्रंयस्य रचना आचार्यविष्णुशर्मणा राजकुमाराणां शिक्षार्थं कृता आसीत्, विश्वस्य सर्वाधिककानूदितकृतिषु अन्यतमा मन्यते, अद्यापि च शतशः भाषासु उपलभ्यते। तथैव नारायणपण्डितविरचितं हितोपदेशः, जतककथासु निहितानि नीतिपरकानि आख्यानानि च, बालकानां नैतिकविकासार्थं शताब्दीभ्यः प्रयुक्ताः भवन्। एतेषां ग्रन्थानां विशेषता इयम् अस्ति यत् एतेषु पशुपक्षिणां माध्यमेन

जटिलानां नैतिकानां व्यावहारिकाणां च शिक्षावाक्यानां सरले रोचके च कथारूपे प्रस्तुतिः कृता वर्तते, येन 'मनोरञ्जनपूर्वकं शिक्षणम्' (edutainment) इति सिद्धान्तः प्राचीनतमा व्याख्या अपि एतेषु ग्रन्थेषु परिलक्ष्यते।

आधुनिकयगे एतामेव परम्परां पुरतो नयन्ती साहित्याकादेमी२०१० तमात् वर्षात् संस्कृतभाषासहितासु सर्वासु मान्यताप्राप्तसु भाषासु पृथक् बालसाहित्यपुरस्कारम् आरब्धवती, यस्याः सम्मानराशिः वर्तमानकाले पञ्चाशत्सहस्ररूप्यकाणि (५०,०००) एकं च प्रशस्तिपत्रम अस्ति। अयं पुरस्कारः तासु कृतिषु प्रदीयते, याः पुरस्कारवर्षात् पूर्वर्तिषु पञ्चसु वर्षेषु प्रथमवारं प्रकाशिताः सन्ति । एवं अयं पुरस्कारः समकाललिकबालसाहित्यसर्जनस्य प्रोत्साहनार्थं सततं व्यवस्थितं च तन्त्रं प्रस्तुतं करोति। संस्कृतभाषायां बालसाहित्यपुरस्कारस्य आरम्भः अस्याः दृष्ट्याः विशेषमहत्त्वं धारयति यत् इयं भाषा, यद्यपि अद्य मातृभाषारूपेण सीमितवक्तृभिरेव उपयुजते, तथापि विद्वत्समाजे, गुरुकुलेषु, संस्कृतविश्वविद्यालयेषु साहित्यिकसङ्घटनेषु च अस्याः सर्जनात्मिका जीवन्तता निरन्तरं वर्तमाना अस्ति।

अस्मिन् शोधपत्रे अयं प्रयासः कृतः वर्तते यत् २०१० तः २०२३ पर्यन्तं त्रयोदशवर्षस्य कालावधेः मध्ये संस्कृतबलसाहित्यपुरस्कारेण सम्मानितानां त्रयोदशानां कवीनां क्रमबद्धः विस्तृतः विश्लेषणात्मकः च परिचयः प्रस्तूयेत, येन संस्कृतबालसाहित्यस्य अध्येतृभ्यः, शोधार्थिभ्यः, शक्षकेभ्यः नीतिनिर्मातृभ्यः च एका समग्रा सन्दर्भसमग्री उपलब्धा भवेत्।

**आचार्यपद्म शास्त्री (2010) – संस्कृतकथाशतकम्**

स्वनाम्नः अनुरूपमेव निजनवनवोन्मेषशालिन्या प्रतिभया संस्कृतसाहित्याकशे पद्मस्येव स्वप्रातिभसौरभेण साहित्याकाशं सुगन्धयतः कविवरस्य पद्मशास्त्रिणः जन्म विक्रमाब्दस्य १९३५तमे वर्षे दिसम्बरमासस्य सप्तदशदिवसे उत्तराखण्डराजन्तर्गते अल्मोड़ाजनपदे सिंगालीनमके ग्रामे समभवत्। तस्य जनकः श्रीबद्रीदत्तौझामहोदयः स्वयमेव संस्कृतस्य प्रकाण्डपण्डित आसीत्।'आशुकविः' इत्युपाधिविभूषितः शास्त्रिमहाभागः बाल्यकालादेव काव्यरचनायां रुचिं वहन् निरन्तरम् अस्यां दिशि संलग्नः आसीत्। संस्कृतबालसाहित्यस्य प्रगतिशीललेखनस्य प्रतिनिधित्वं कुर्वता अनेन रचनाकारेण नानाकथासूत्राणि गुम्फयित्वा 'विश्वकथाशतकम्' इति नाम्ना ग्रन्थः विरचितः।[1] वस्तुतः 'संस्कृतकथाशतकस्य' गुम्फनं कविना सरलया सरसया मनोहरया च भाषाशैल्या बालकानां मनोरञ्जनाय नैतिकज्ञानप्रदानाय च कृतम्।

यथा च कविना स्वयमेव ग्रन्थस्य प्रस्तावनाभागे उक्तम् अस्ति –

**"भूतलेऽस्मिन् विशेषेण मानवोऽयं कथाप्रियः । कथाभिः कल्पनाशक्तिः बालकेषु विवर्धते ।।**

**कथासु गुम्फितं चास्ति समग्रं लोकजीवनम् । बालकानां विबोधाय कथानां च निदर्शनम् ।।**

**बाला विविधभावानां कथाः श्रुत्वा प्रहर्षिताः । ऐक्यभावनया युक्ता विश्वशान्तिप्रवर्धकाः ।।**

[1]राजस्थानीयमभिनवसंस्कृतसाहित्यम्, डॉ. गंगाधर भट्ट (चतुर्थ खण्ड), पृ. 79-95

**गुम्फितं संस्कृतकथाशतकं सरलं मया। संस्कृतस्य प्रसाराय मनोरंजनहेतवे।।"[2]**

बालकेषु संस्कृतभाषायाः अवबोधवर्धनाय तेषु नैतिकमूल्यविकासाय च पद्मशास्त्रिविरचितस्य'कथाशतकस्य' (द्वितीयखण्डस्य) कृते २०१०तमे वर्षे केन्द्रीयसाहित्याकादम्या 'बालसाहित्यपुरस्कारेण' सम्मानः कृतः। 'विश्वकथाशतकस्य' प्रथमद्वितीययोः खण्डयोः निर्दिष्टाः सर्वाः शतसंख्याकाः कथाः बालकेषु शील-सदाचार-पवित्रता-नैतिकता-सामाजिकता-दया-क्षमा-त्याग-साहसादीनां नैतिकमूल्यानां प्रदाने पूर्णतया समर्थाः सन्ति। यत्र एकतः एताः बालकथाः बालकेभ्यः मनोरञ्जनं प्रयच्छन्ति, तत्र अन्यतः बालकेषु कल्पनाशक्तिं जागरयितुमपि पूर्णतया समर्थाः सन्ति।

## प्रो. अभिराज राजेंद्र मिश्र (2011) – कौमारम्

आधुनिकसंस्कृतसाहत्ये बालसाहित्यविधायौ अग्रगण्यः पुरोधाः प. मिश्रमहोदयः विक्रमसंवत् 1999 तमे वर्षे महापौषमासस्य कृष्णपक्षनवम्यां (शनिवासरे) जन्म प्रातवान् , या आङ्लतिथ्यनुसार 2 जनवरी 1943 तमस्य आसीत्। एतस्य जन्मभूमिः उत्तरप्रदेशराज्यस्य जौनपुरमण्डले स्थितः द्रोणपुरनामको ग्रामो वरते, यत् सेईनदीतटे विराजते।[3]"त्रिवेणीकविः" इति विरदेन तथा "अभिराजः" इति उपाधिना विभूषितः कविः राजेन्द्रमिश्रः पण्डितदुर्गाप्रसादमिश्रस्य अभिराजीदेव्याश्च मध्यमः सन्तानः आसीत्।[4] कविः स्वजननीं प्रति ममत्वात् स्नेहाच्च "अभिराजः" इति नाम स्वोपनमत्वेन स्वीकृतवान्। एतस्य विषयस्य उल्लेखं कविः स्वयमेव स्वनाट्यकृतौ "पञ्चगव्यम्" इत्यस्यां कृतवान् -

**"अभिराजी नाम्नासि जननि तस्मादऽहमप्यभिराजः ।**

**त्वमसि मदर्थं यमुना-गङ्गा-भरत धराचलराजः ।।[5]**

प्रो. मिश्रमहोदयानां प्रारम्भिकशिक्षा द्रोणपुरग्रामस्य प्राथमिकविद्यालये एव सम्पन्ना अभवत्। एतैः इलाहाबादविश्वविद्यालयात् 1962 तमे वर्षे स्नातकोपाधिः, 1964 तमे वर्षे संस्कृतविषये स्नातकोत्तरोपाधिः, तथा 1966 तमे वर्षे डी.लिट्.-उपाधिः च प्राप्ता।"त्रिवेणीकविः" इति विरुदेन विभूषितः प्रो. मिश्रमहोदयः संस्कृतसहित्यस्य प्राचीनपरम्परयां प्रचलितानि महाकाव्य-नाटक-कथा-आख्यायिका-खण्डकाव्यादीनि विधाः, तथैव आधुनिकयुगे विकसितानि कथा-कथानिका-एकाङ्की-उपन्यास-लघुनाटक-गीत-कविता-बालसाहित्यादीनि नवीनविधाः च स्वलेखन्या सफलतया प्रारेभे ।

एतस्य कृतिः "कौमारम्" (2000 ख्रीष्टाब्दे) 2011 तमे वर्षे बालसाहित्यपुरस्कारेण सम्मानिता। एषः ग्रन्थः द्विपञ्चाशतः(52) शिशुगीतानां संग्रहः , यत्र प्रो. मिश्रमहोदयेन बालकानां कृते स्वतन्त्ररूपेण रचितनि एता बालकविताः समाहृताः सन्ति। एतासां कवितानां वैशिष्ट्यम् अस्ति यत् एताः बालकान् क्रमिक-मानसिक-भावनात्मकविकास सोपानशः दर्शयन्ति। अत्र विविधाः

---

[2]विश्वकथाशतकम्, पद्मशास्त्री 'आशुकवि' प्राक्कथन भाग से उधृत
[3]प्रो. अभिराजराजेन्द्रमिश्रमहोदयेन प्रेषिताय आत्मजीवन्याः उद्धृतम्
[4]नाट्यनवग्रहम् ईश्वरान्वेषणम्, पृ.-1
[5]नाट्यपंचगव्यम्-व्यक्तित्व एवं कृतित्व, पृ.-79

विषयाः समविष्टाः सन्ति — यथ ईश्वरवन्दना, पारिवारिकसम्बन्धा, मातापित्रोः महत्तम्, विद्यालयपरिवेशजनं (ग्राम-नदी-उद्यान-रेलयनादिविषयकम्) च। तदतिरिक्तं बालकानां विविधानुभवानां — यथा पतङ्, मधुमक्षिका, पपीलिका, तेषां जज्ञासाः, स्वप्नानुभवाः इत्यादीनां — सुन्दरं चित्रणमपि दृश्यते। तथैव विविधोत्सवसम्बद्धं बोधगम्यं ज्ञानमपि एतासु कवितासु प्रदत्तम् अस्ति।

**ओमप्रकाशठाकुर (2012) - ईसप्-कथा-निकुंजम्**

श्रीमान् ओमप्रकाशठाकुरमहोदयः आधुनिकसंस्कृतसाहित्यस्य एकः समर्पितः रचनाकारः, शिक्षाविद् पुरस्कृतसहित्यकारश्च आसीत्, येन बालसाहित्ये, नीतिकथासु काव्यक्षेत्रे च महत्त्वपूर्णं योगदानं कृतम्।अस्य जन्म २०-सितम्बरमासे १९३४ ख्रीष्टाब्दे अलीपुरग्रामे, मुज़फरगढ़मण्डले (वर्तमान-पाकिस्तानदेशे) अभवत्। अस्य पितरौ स्वर्गीयः श्रीपोखरदासः जनकः, स्वर्गीया श्रीमती कृष्णादेवी च जननी आसीत् अनेन पञ्जाबविश्वविद्यालयात् शास्त्रि-उपाधिः, दिल्लीविश्वविद्यालयात् संस्कृतविषये एम्.ए.-उपाधिः, दरभङ्गानगरात् (मिथिलाप्रदेशात्) साहित्याचार्य-उपाधिश्च प्राप्ता।अनेन दिल्लीप्रशासनस्य अधीने राजकीय-वरिष्ठ-माध्यमिक-विद्यालयेषु चत्वरिंशत्-वर्षपर्यन्तम् अध्यापनं कृतम्, उपप्रधानाचार्यपदात् च सेवानवृत्तिः प्राप्ता।

अस्य उल्लेखनीयासु रचनासु सन्ति — गीतिमञ्जरी, इन्द्रधनुः, नीतिकथामकरन्दः, कथामन्दाकिनी, प्रेरणापारिजातम्, सुमनोवटिका, तेनालीकथाकौतुकम्, ईसपकथानिकुञ्जम् च।

ईसपकथानिकुञ्जम् इति संस्कृतबालसाहित्यस्य एकः महत्तपूर्णः, शिक्षाप्रदः मूल्यपरकश्च ग्रन्थः वर्तते। अस्यै कृतये २०१२-तमे वर्षे साहित्यअकादमी-बालसाहित्यपुरस्कारः (संस्कृतभाषायाम्) प्राप्तः, येन अस्य साहित्यिकम् उत्कृष्टत्वं संस्कृतबालसाहित्ये अस्य विशिष्टं योगदानं च प्रमाणितं भवति। अयं ग्रन्थः विश्वविख्यातस्य यूनानदेशीयस्य कथाकारस्य ईसपस्य (Aesop) प्रसिद्धानां नतिकथानां संस्कृतरूपान्तरं वर्तते, यत् विशषतः बालकानां नैतिकं, बौद्धिकं चारित्रिकं विकासं दृष्ट्वा प्रस्तुतम्। सरलया, सरसया सुबोधया च संस्कृतभाषया रचितः अयं ग्रन्थः बालकेषु संस्कृतभाषायां रुचिं जागरयति, जीवनोपयोगीनां मूल्यान संस्काराणि च विकासयति।

अस्मिन् ग्रन्थे अनेकाः लघ्व्यः रचकाश्च कथाः सङ्कलिताः सन्ति, यासां पमुखाः पात्राणि सिंहः, लोमशः, काकः, कपोतः, कूर्मः, शशकः, वृकः, गर्दभः, अन्ये च पशुपक्षिणः सन्ति। एतेषां पात्राणां माध्यमेन सत्यं, सत्यनिष्ठा, परिश्रमः, मैत्री, सहयोगः, धैर्यम्, आत्मविश्वासः, विवेकः, सदाचारश्च इति मानवीयगुणानां महत्त्वं प्रतिपादितम्। तथैव लोभः, अहङ्कारः, छलम्, कपटम्, आलस्यम्, असत्यं च इति दुर्गुणानां दुष्परिणामाः अपि अतीव प्रभावशालिनाः चित्रिताः।

**डॉ.एच.आर. विश्वास (2013) — मार्जालस्य मुखं दृष्टम्**

अस्य जन्म कर्णाटकराज्यस्य चिक्कमंगलूरु-जनपदे अभवत्। एतेन साहित्यविषये स्नातकोत्तर-उपाधिः (एम.ए.) प्राप्ता, कुवेम्पु-विश्वविद्यालयतः च विद्यावारिधि-उपाधिः (Ph.D.) अर्जिता। संस्कृतभाषायाः प्रचार-प्रसारं प्रति एतस् गाढायाः निष्ठायाः कारणात् एषः संस्कृतभारती-संघटनस्य पूर्णकालिक-कार्यकर्तृरूपेण सम्मिलितः अभवत्।आधुनिक-संस्कृतसाहित्ये एतस्य विशेषा रुचिः

आसीत्, यस्याः फलसरूपेण एतेन कञ्चित् कालं यावत् 'सम्भाषणसन्देशः' इति नामकस्य मासिकपत्रिकाया प्रधानसम्पादकस्य दायित्वम् अपि निर्वाहितम्। संस्कृतभारत्या आयोजितेषु सम्भाषण-शिबिरेषु सम्मिलितानां बालकानां मनोविनोदाय नैतिक-विकासाय च एतेन पञ्चविंशति (25) विनोदजनक-लघुनाटकानां संकलनेन युक्तस्य "मार्जालस्य मुखं दृष्टम्" (जनवरी-2011 ख्रीस्ताब्दे) इति ग्रन्थस्य प्रणयनं कृतम्।

अस्मिन् ग्रन्थे त्रिविधा विषयवस्तु समाहिता वर्तते - संस्कृतभाषासम्बद्धाः विषयाः, समकालीनजीवनाधारिताः लोककथाः, पौराणिकप्रसङ्गाश्च। सर्वेषु नाटकेषु सरला सुगमा च संभाषण-शैली प्रयुक्ता वर्तते, यथा संस्कृतम् अधीयमानाः बालकाः सुगमतया अवगच्छेयुः, वदेयुश्च।अनयैव कृत्या डॉ. एच्.आर्. विश्वास-महोदयाय वर्षे 2013 (द्विसहस्रत्रयोदश-वर्षे) साहित्य-अकादमी-पुरस्कारः प्रदत्तः।

**जनार्दनहेगडे(2015) - बालकथासप्ततिः**

जनार्दन-हेगड़े-महोदयस्य जन्म कर्णाटकराज्यस्य उडुपी-जनपदे अभवत्। एते आधुनिक-संस्कृतसाहित्यस्य संस्कृतपत्रकारितायाश्च प्रतिष्ठिताः विद्वांसः सन्ति। संस्कृतभाषायाः प्रचार-प्रसारे, आधुनिक-संस्कृतलेखने, विशेषतः संस्कृत-बालसाहित्यस्य विकासे च एतेषां योगदानम् अत्यन्तं महत्त्वपूर्णं मन्यते।बालसाहित्यक्षेत्रे एतेषां उत्कृष्टं योगदानं राष्ट्रियस्तरे व्यापकं मान्यतां प्राप्तवत्। एतेषां प्रसिद्धकृत्याः 'बालकथासप्ततिः' इत्यस्याः कृते एतेभ्यः वर्षे 2015 (द्विसहस्रपञ्चदश-वर्षे) केन्द्रीय-साहित्य-अकादम्याः बालसाहित्यपुरस्कारः (संस्कृतविभागे) प्रदत्तः। तदतिरिक्तं संस्कृतसाहित्यस्य संस्कृतेश्च क्षेत्रे एतेषां उल्लेखनीयस्य योगदानस्य कृते वर्षे 2017 (द्विसहस्रसप्तदश-वर्षे) उत्तरप्रदेश-सर्वकारेण 'नारदस्मृतिपुरस्कारः' अपि प्रदत्तः। 'बालकथासप्ततिः' संस्कृत-बालसाहित्यस्य एका उत्कृष्टा मूल्यपरका च कृतिः वर्तते। अस्याः मुख्यम् उद्देश्यं बालकानां स्वस्थं मनोविनोदं कुर्वत् संवादात्मकया रोचकया कथाशैल्या नैतिकानां सामाजिकानां मानवीयमूल्यानां च शिक्षां प्रदातुम् अस्ति। अस्मिन् ग्रन्थे सप्तति-सङ्ख्यकानां (70) नीतिकथानां संकलनं कृतम्। अत एव कारणात् लेखकेन अस्याः कृतेः नाम 'बालकथासप्ततिः' इति स्थापितम्।अस्य ग्रन्थस्य अधिकांशाः कथाः संस्कृतस्य लोकप्रियायाः मासिकपत्रिकायाः 'सम्भाषणसन्देशः' इत्यस्याः 'बालमोदिनी' इति स्तम्भे पूर्वं प्रकाशिताः आसन्। पाठकानां लोकप्रियतां उपयोगितां च दृष्ट्वा एतासां सर्वासां कथानां संकलनं पुस्तकाकाररूपेण प्रकाशितम्।अस्याः कथाः सरलया सरसया संवादप्रधानया च शैल्या लिखिताः सन्ति, येन बालकेषु संस्कृतभाषां प्रति रुचिः जागर्ति। प्रत्येकं कथया सत्यस्य, सत्यनिष्ठायाः, परिश्रमस्य, मित्रतायाः, करुणायाः, विवेकस्य, अनुशासनस्य, सदाचारस्य च नैतिकमूल्यानां सुगमतया सम्प्रेषणं कृतम् अस्ति। मनोविनोदस्य शिक्षणस्य च सुन्दरः समन्वयः अस्याः कृतेः प्रमुखं वैशिष्ट्यम् अस्ति। अत एव कारणात् 'बालकथासप्ततिः' आधुनिक-संस्कृत-बालसाहित्यस्य श्रेष्ठकृतिषु स्वकीयं विशिष्टं स्थानं धारयति, संस्कृतभाषायाः शिक्षार्थिभ्यः बालपाठकेभ्यश्च समानरूपेण उपयोगिनी सिद्धा भवति।

**ऋषिराजजानी (2016) - चमत्कारिक: चलदूरभाष:**

एतेषां जन्म ३ अप्रैल १९८८ तमे दिनाङ्के गुजरातराज्यस्य अहमदाबाद-नगरे संस्कृतस्य प्रख्यातकवेः डॉ. हर्षदेवमाधवस्य सुपुत्ररूपेण अभवत्। पारिवारिकसंस्कृतमयवातावरणस्य कारणात् बाल्यकालादेव एतेषां संस्कृतभाषायाः साहित्यस्य च विषये गभीरा रुचिः विकसिता। पञ्चतन्त्रस्य, हितोपदेशस्य, रामायणस्य, महाभारतस्य च कथाभिः प्रेरिताः सन्तः एते अल्पवयसि एव साहित्यसृजनं प्रारब्धवन्तः।संस्कृतबालसाहित्यक्षेत्रे ऋषिराजजानिमहोदयस्य मुख्यतया द्वे रचने उल्लेखनीये स्तः — बालकथासङ्ग्रहः 'चमत्कारिकः चलदूरभाषः' तथा बालगीतसङ्ग्रहः 'कपिः कूर्दते शाखायाम्' इति।

'चमत्कारिकः चलदूरभाषः' इत्यस्मिन् ग्रन्थे लेखकेन वर्तमानस्य औद्योगिकयुगस्य महानगरीयजीवनशैल्या प्रभावितपरिवेशः अतीव सहजया, कल्पनाप्रधानया संवादप्रधानया च शैल्या प्रस्तुतः अस्ति, येन इयं रचना बालपाठकानां कृते रोचिका मनोरञ्जिका च भवति। इयमेव रचना २०१६ तमे वर्षे साहित्य-अकादम्याः बालसाहित्यपुरस्कारेण सम्मानिता जाता।

**राजकुमारमिश्रः (2017) - डयते कथमाकाशे?**

समकालिक-संस्कृत-बालसाहित्यस्य अध्येतृषु डॉ. राजकुमारमिश्रमहोदयस्य नाम विशेषेण उल्लेखनीयम् अस्ति। एतस्य जन्म २६ जुलाई-मासे, १९८१ खीष्टाब्दे, उत्तरप्रदेशराज्यस्य वाराणसी-जनपदान्तर्गत कठिरांव-नामके ग्रामे अभवत्। शैक्षणिकदृष्ट्या अनेन सम्पूर्णानन्द-संस्कृतविश्वविद्यालयात्, वाराणसीतः, आचार्य-विद्यावारिधि (पीएच.डी.) उपाधी प्राप्तौ । एतस्य अध्ययनानुसन्धानस्य मुख्यं क्षेत्रं प्राचीनम् अर्वाचीनं च संस्कृतसाहित्यम् अस्ति। सम्प्रति डॉ. मिश्रमहोदयः हरियाणा-संस्कृतविद्यापीठे, पलवले, साहित्यविभागे सहाचार्यपदे कार्यरतः सन् संस्कृतभाषायाः साहित्यस्य च सेवायां संलग्नः अस्ति।एतस्य विद्वत्तायाः साहित्यिकावदानस्य च स्वीकृतिस्वरूपं बहूनि सम्मानानि प्राप्तानि, यथा — साहित्य-अकादमी-युवापुरस्कारः (२०१३), उत्तरप्रदेश-संस्कृतसंस्थानेन प्रदत्तं विशेषसम्मानम् (२०१३), तथा उत्तराखण्ड-संस्कृत-अकादम्या, हरिद्वारे, आयोजितायाम् अखिलभारतीय-लघुनाटक-प्रतियोगितायां प्राप्तं सम्मानम् (२०१४)।

डॉ. मिश्रमहोदयस्य सर्वाधिकचर्चिता पुरस्कृता च कृतिः 'डयते कथमाकाशे?' इति अस्ति, यस्याः कृते एतस्मै वर्षस्य २०१७ बालसाहित्यपुरस्कारः प्रदत्तः। इयं संस्कृत-बालकवितासङ्ग्रहः वर्तते, यस्मिन् कविः बालमनसः स्वाभाविकीं जिज्ञासां, कल्पनाशक्तिं, प्रकृतिं प्रति सहजम् आकर्षणं च अत्यन्तं सरलया, सुबोधया, रोचिकया च शैल्या अभिव्यक्तवान्। अस्यां कृतौ आकाश-विहङ्ग-प्रकृति-विज्ञान-दैनन्दिनजीवनसम्बद्धविषयाणां माध्यमेन बालकेषु ज्ञानवर्धनस्य, संवेदनशीलतायाः, नैतिकमूल्यानां विकासस्य च प्रयासः परिलक्ष्यते। सङ्ग्रहस्य शीर्षकं 'डयते कथमाकाशे?' (अर्थात् आकाशे कथम् उड्डीयते इति) स्वयमेव बालसुलभवैज्ञानिकजिज्ञासायाः प्रतीकात्मकं निदर्शनम् अस्ति।समालोचनात्मकदृष्ट्या विवेचनं कुर्वता स्पष्टं भवति यत् अस्यां कृतौ मनोरञ्जनस्य ज्ञानवर्धनस्य च समन्वितं समावेशनम् आधुनिकसंस्कृतबालसाहित्यस्य मूलभूतप्रवृत्तीनां प्रतिनिधित्वं करोति। अतः वैज्ञानिकचेतनायाः बालमनोविज्ञानस्य च दृष्ट्या अयं सङ्ग्रहः संस्कृतबालसाहित्यस्य इतिहासे एकं महत्त्वपूर्णं स्थानं धारयति।

**डॉ सम्पदानंदमिश्रः(2018) - शनैः शनैः**

डॉ. सम्पदानन्दमिश्रमहोदयस्य जन्म १९७१ ख्रीषब्दस्य नवम्बर-मासस्य १७ दिनाङ्के ओडिशाप्रान्ते अभवत्। २०१२ तमे वर्षे भरतस्य राष्ट्रपतिना एषः 'महर्षिबदरायणव्याससम्मानेन' अलङ्कृतः। २०१४ तमस्य वर्षस्य अगस्त-मासस्य १५ दिनाङ्के श्रीमिश्रमहोदयेन बालकान मनोरञ्जनार्थं, ज्ञानवर्धनार्थं, संस्कृतस्य प्रति अनुरागार साहित्यलेखने रुचिजागरणार्थं च अरविन्दो-सोसायट्याः, पुदुच्चेर्या, तत्त्वावधाने 'संस्कृतबालसाहित्यपरिषदः' स्थापना कता। एतेन माध्यमेन सः बालकेषु संस्कृतभाषां प्रति गाढं प्रेम उत्पादयितुं, तेषां भाषासम्बद्धां बोधशक्तिं वर्धयितुं, सौन्दर्यबोधं च विकासयितुं निरन्तरं सकायः वर्तते, तथा च बालकान् स्वयं साहित्यसर्जनाय प्रेरयितुम् अपि प्रशंसनीयं कार्यं करोति।

तदतिरिक्तं, बालसाहित्यक्षेत्रे एतस्य विशिष्टं योगदानं दृष्ट्वा २०१८ तमे वर्षे केन्द्रीय-साहित्य-अकादम्या एतस्य कृत 'शनैः शनैः' इति नाम्नः बालकाव्यस्य कृते 'बालसाहित्य-अकादमी-परस्कारेण' सम्मानः कृतः। एतस्य काव्यसङ्ग्रहे 'शनैः शनैः' इतस्मिन् निहिता लयबद्धता शब्दद्विरुक्तिः च संस्कृतकाव्यस्य ध्वन्यातकां परम्परां प्रतिबिम्बयति, या बालकवितायै विशेषेण उपयुक्ता सिध्यति, यतः एतेन स्मरणं मौखिकवाचनं च सुगमं भवति। अयं सङ्ग्रहः सम्भवतः धैर्यं, संयमं, क्रमिकं विकासं च मूल्यानि केन्द्रीकृत्य रचितः इति प्रतीयते।

**संजय चौबे (2019) - चित्वा तृणं तृणम्**

डॉ. संजयकुमारचौबेमहोदयस्य जन्म १९८४ ख्रीष्टाब्दस्य जनवरी-मासस्य १९ दिनाङ्के बिहार-राज्यस्य बक्सर-जिलान्तर्गते राजापुर-गोसाईपुर-नामके लघुग्रामे श्रीशोभानाथचौबेमहोदयस्य श्रीमतीहीरामुनीदेव्याः च गृहे अभवत्। एतेन काशी-हिन्दू-विश्वविद्यालयात्, वाराणस्याः, स्नातकोत्तर-उपाधिः, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठात्, नवदेहल्याः, विद्यावारिधि (पीएच.डी.) उपाधिश्च प्राप्ता।अर्वाचीन-संस्कृतसाहित्यक्षेत्रे एतेन बालोपयोगि-बालगीतिसङ्ग्रहस्य 'चित्वा तृणं तृणम्' इत्यस्य रचना कृता, यस्मिन् पञ्चविंशतिः गीतानि सङ्कलितानि सन्ति। एतेषु गीतेषु बालमनसः सहजाः भावनाः तासां स्वाभाविकीः क्रीडाश्च आत्मसात् कृत्वा अत्यन्तं सरला मधुरा च भाषाशैली अङ्गीकृता। सङ्ग्रहस्य प्रत्येकं गीतं बालसुलभाभिः भावनाभिः गाढतया सम्बद्धं प्रतीयते।

अस्य सङ्ग्रहस्य एकं प्रेरणादायकं मनोहरं च गीतं तेषां महतां बालकानां स्मरणं कारयति येषां कार्याणि भारतीयसंस्कृतौ आदर्शरूपेण उदाहरणरूपेण च प्रतिष्ठितानि सन्ति, ये च वर्तमानपीढ्याः बालकेषु शौर्ये, निर्भीकतायाम्, तेजस्वितायाञ्च इत्येतेषु मूल्येषु नवीनायाः ऊर्जायाः सञ्चारं कुर्वन्ति।डॉ. संजयकुमारचौबेमहोदयाय एतस्याः कृतेः 'चित्वा तृणं तृणम्' इत्यस्याः कृते २०१९ तमस्य वर्षस्य बालसाहित्यपुरस्कारः प्रदत्तः।

### अरविन्द कुमार तिवारी (2020) - बालगुञ्जनम्

डॉ. अरविन्दकुमारतिवारीमहोदयस्य जन्म १९७९ ख्रीष्टाब्दस्य मार्च-मासस्य १० दिनाङ्के बिहार-राज्यस्य मटिहानो-माधो-नामके ग्रामे श्रीसालिकतिवारिमहोदयस्य श्रीमती-दुर्गावतीदेव्याः च गृहे अभवत्। एतेन काशी-हिन्दू-विश्वविद्यालयात् स्नातकोत्तर-उपाधिः, बनारसतः एव विद्यावारिधि (पीएच.डी.) उपाधिश्च प्राप्ता।डॉ. तिवारिमहोदयः समकालिकसंस्कृतसाहित्यजगतः सुप्रतिष्ठितः कविः, लेखकः, शिक्षाविच्च इति सर्वत्र प्रसिद्धः। एतेन संस्कृतभाषायां बालसाहित्येन शोधपरकसाहित्येन च सम्बद्धाः अनेकाः उल्लेखनीयाः कृतयः रचिताः। एतस्य साहित्ये सरलता, प्रवाहः, संस्कृतस्य आधुनिकाभिव्यक्तिशैल्याः च सुन्दरं सामञ्जस्यं परिलक्ष्यते।

अर्वाचीन-संस्कृतकाव्यविधासु अभिनवगीतविधायाम् बालसाहित्यस्य परम्परां अनुसरन् एतेन एकपञ्चाशद्-बालगीतानां सङ्ग्रहरूपेण 'बालगुञ्जनम्' इति शीर्षकायाः कृतेः रचना कृता। अस्याः काव्यकृतेः केन्द्रीयं पात्रं दशवर्षीयः बालकः 'विभवतिवारी' अस्ति, यस्य बालसुलभानि क्रीडनानि क्रियाकलापाश्च सम्पूर्णे काव्ये भ्रमरस्य गुञ्जनम् इव निरन्तरं गुञ्जायमानानि प्रतीयन्ते।अस्याः एव कृतेः 'बालगुञ्जनम्' इत्यस्याः कृते डॉ. अरविन्दकुमारतिवारिमहोदयाय २०२० तमस्य वर्षस्य साहित्य-अकादमी-बालसाहित्यपुरस्कारः (संस्कृतभाषायाम्) प्रदत्तः। अयं काव्यसङ्ग्रहः बालकानां स्वाभाविकीं रुचिं, जिज्ञासां, मनोवैज्ञानिकीः आवश्यकताश्च दृष्ट्वा रचितः, यस्मिन् प्रकृतिः, पर्यावरणम्, राष्ट्रप्रेम, नैतिकशिक्षा, अनुशासनम्, पारिवारिकसंस्काराः मानवीयमूल्यानि च सम्बद्धाः विषयाः सहजया मधुरया च संस्कृतभाषया अभिव्यक्ताः सन्ति। भाषायाः सरलता, लयात्मकता, बालोपयोगिता च कारणेन इयं कृतिः संस्कृतबालसाहित्यस्य एका महत्त्वपूर्णा उपलब्धिः मन्यते।

### आशा-अग्रवाल (2021) – कथामाधुरी

संस्कृतबालसाहित्यस्य समकालिकपरिदृश्ये आशा-अग्रवालमहोदयायाः नाम विशेषेण उल्लेखनीयम् अस्ति। इयं श्रीअरविन्दो-अन्तर्राष्ट्रीय-शिक्षाकेन्द्रे, पुदुच्चेर्याम्, संस्कृताध्यापिकापदे कार्यरता वर्तते, तथा च संस्कृतभाषाशिक्षणेन सह बालसाहित्यसृजने अपि सक्रियं योगदानं ददाति। एतस्याः सर्वाधिकप्रतिष्ठिता कृतिः 'कथमाधुरी' इति सचित्रा कथासङ्ग्रहः वर्तते, या श्रीअरविन्-सोसायट्याः अन्तर्गते Auro Publications इत्यनेन प्रकाशिता जाता। अयं सङ्ग्रहः पारम्परिकायां कथाशैल्यां रोचकानां शिकप्रदानां च आख्यानानां सङ्कलनं प्रस्तौति, यस्मिन् समहिताः सर्वाः कथाः बालमनोविज्ञानानुरूपं रचिताः सन्, बालभावनाभिश्च गाढतया सम्बद्धाः सन्ति। कतेः उद्देश्यं बालकेषु संस्कृतभाषायाः प्रति सहजां प्रीतिम् उत्पादयितुं, कथामाध्यमेन च तेषां चरित्रनिर्माणे साहाय्यं कर्तुं च अस्ति।

अस्य साहित्यिकावदानस्य स्वीकृतिस्वरूपं आशा-अग्रवालमहोदयायै 'कथामाधुर' इत्यस्याः कृते साहित्य-अकादम्या संस्कृतभाषायै बालसाहित्यपुरस्कारः २०२१ प्रदत्तः। इदम् उल्लेखनीयं यत् अस्यां परस्कारसूच्यां आशा-अग्रवालमहोदया महिलारचनाकारेषु एकं प्रमुखं नाम वर्तते, यत् संस्कृतबालसाहित्ये महिलालेखनस्य सुदृढाम् उपस्थितिं अङ्कयति । एषः सम्मानः

संस्कृतबालसाहित्ये भाषाशिक्षणस्य, मूल्यसंस्काराणां, बालमनोरञ्जनस्य च समन्वयस्य दिशायाम एतस्याः महत्त्वपूर्णं योगदानं स्पष्टीकरोति।

**प्रो.कुलदीप शर्मा (2022) - सचित्रम् प्रहेलिकाशतकम्**

**प्रो.**कुलदीपशर्मा विख्यातः संस्कृतलेखकः वर्तते । तस्य जन्म १९८३ तमे वर्षे अक्टोबर्-मासस्य ८ दिनाङ्के राजस्थानस्य जयपुरे अभवत् । संस्कृतस्य हिन्द्या, राजस्थानीभाषायाः, आङ्ग्लभाषायाः च सुविदितः अस्ति ।. संस्कृतभाषायां सम्प्रति नवीदिल्लीनगरस्य केन्द्रीयसंस्कृतविश्वविद्यालये प्राध्यापकरूपेण कार्यं करोति ।

अद्यपर्यन्तं तस्य चत्वारो ग्रन्थाः प्रकाशिताः सन्ति- भारतीयं शिक्षादर्शनम्, सचित्रं प्रहेलिकाशतकं, संस्कृतशिक्षणभूमिका, संस्कृतशिक्षणदीपिका च । तस्य विद्वत्साहित्य-योगदानयोः कृते राष्ट्रपतिपुरस्कारः, सुधिश्रीसम्मानः, संस्कृतयुवप्रतिभापुरस्कारः च इत्यादयः अनेकप्रतिष्ठितपुरस्कारैः सम्मानितः अस्ति । संस्कृते सचित्रम् प्रहेलिकाशतकम् इति ग्रन्थस्य कृते साहित्य अकादमी बालसाहित्यपुरस्कारः २०२२ इति अस्य उल्लेखनीया उपलब्धिः अस्ति ।

अयं ग्रन्थः संस्कृते लिखितस्य प्रहेलिका-काव्यस्य अद्वितीयः संग्रहः अस्ति, यस्मिन् कुलम् १५० नवपुराणसंस्कृतप्रहेलिकाः सन्ति । बालमनोविज्ञानस्य शैक्षणिकमनोविज्ञानस्य च सिद्धान्ताधारितः अयं ग्रन्थः संस्कृतक्षेत्रे अस्य प्रकारस्य प्रथमः प्रकाशनः अस्ति । अस्य विशिष्टं विशेषता अस्ति यत् प्रत्येकस्मिन् विषमसङ्ख्यायुक्ते पृष्ठे चतस्रः प्रहेलिकाः मुद्रिताः भवन्ति, पृष्ठं परिवर्त्य समसङ्ख्यायुक्ते पृष्ठे तेषां उत्तराणि प्रदत्तानि भवन्ति, येन पाठकाः शीघ्रमेव समाधानं प्राप्तुं शक्नुवन्ति अपि च, पुस्तके शतप्रहेलिकानां उत्तराणि अपि गुप्तरूपेण प्रदत्तानि सन्ति, यत् क्रॉसवर्ड-सदृशसंरचनायाः सचित्रं भवति, यस्य समाधानं पाठकाः स्केच-पेन-द्वारा अथवा हाइलाइटर-द्वारा चिह्नं कृत्वा कर्तुं शक्नुवन्ति-यत् पुस्तकस्य पुनः पुनः उपयोगः "विप क्लीन"-पद्धत्या कर्तुं शक्नोति।

भाषागतसरलतां निर्वाहयितुम् सम्पूर्णे पुस्तके केवलम् अनुष्टुप्मानकम् उपयुज्यते, येन बालकाः क्रीडायाः माध्यमेन सहजतया अवगन्तुं शिक्षितुं च शक्नुवन्ति।

**प्रो.राधावल्लभ त्रिपाठी (2023) –मानवी**

प्रो. राधावल्लभत्रिपाठिनः समकालिक-भारतीय-साहित्यजगति संस्कृत-हिन्दीभाषयोः समानाधिकारं धारयतां विरलानां विदुषां मध्ये गण्यन्ते। एते संस्कृतसाहित्यम् आधुनिकसंवेदनया सह योजयितारो विद्वांसः, कवयः, नाट्यकारा, निबन्धकाराः, समीक्षकाः, कथाकाराः अनुवादकाश्च इतिरूपेण प्रतिष्ठिताः सन्ति। एतेषाम् अध्ययनक्षेत्रे प्राचीनसंस्कृतकाव्यशास्त्रात् आरभ्य आधुनिकरङ्गमञ्चपर्यन्तं व्यापकं विषयवस्तु अन्तर्भवति।आचार्यत्रिपाठिमहोदयस्य जन्म १९४९ तमे वर्षे फरवरीमासस्य पञ्चदशे दिनाङ्के मध्यप्रदेशस्य राजगढ-मण्डले अभवत्। एतेषां पितामहः रामप्रसादत्रिपाठी पिता च गोकुलप्रसादत्रिपाठी संस्कृत-हिन्दीभाषयोः विद्वांसौ समीक्षकौ च आस्ताम्, यौ छतरपुर-स्थिते महाराजमहाविद्यालये संस्कृतस्य प्राध्यापकौ आस्ताम्, येन कारणेन एतेभ्यः बाल्यकालादेव संस्कृत-हिन्दीभाषयोः समन्वितसंस्कारयुक्तं पारिवारिकं वातावरणं

प्राप्तम्। एतेषां विवाहः १९७४ तमे वर्षे सत्यवतीदेव्या सह अभवत्।एतैः सागरविश्वविद्यालयात् एम्.ए.-उपाधिं प्राप्य 'संस्कृतकवीनां व्यक्तित्वस्य विकासः' इति विषये पीएच्.डी.-उपाधिः, 'प्राचीनभारते रङ्गमञ्चस्य उद्गमः विकासश्च' इति विषये डी.लिट्.-उपाधिश्च अर्जितः । १९७० तमात् वर्षात् एतैः अध्यापनकार्यम् आरब्धम्, अग्रे च शोधनिर्देशने उच्चशिक्षाप्रशासने च सक्रियं योगदानं दत्तम्, तथा च राष्ट्रियसंस्कृतसंस्थानस्य (मानितविश्वविद्यालयस्य), नवदिल्ल्याः कुलपतिपदेऽपि स्थिताः।एतेषां सर्वाधिकं महत्त्वपूर्णं योगदानम् इदम् अस्ति यत् एतैः संस्कृतभाषां तस्याः पारम्परिकात् शास्त्रीयाच्च स्वरूपात् अग्रे नीत्वा तस्याम् आधुनिकजीवनबोधः, नाट्यप्रयोगः, उपन्यासादिविधाश्च समाविष्टाः; संस्कृते उपन्यासलेखनस्य परम्परा समृद्धा कृता; हिन्दीभाषायामपि समानरूपेण महत्त्वपूर्णं समीक्षात्मकं सर्जनात्मकं च लेखनं कृतम्। एकस्याः जीर्णशीर्णायाः हस्तलिपेः आधारेण एतेभ्यः 'विक्रमादित्यकथा' इति नाम्नः कृतेः सामग्री प्राप्ता, या एतैः हिन्दीभाषायाम् उपन्यासरूपेण दत्ता।

एतेषां प्रमुखासु कृतिषु सन्धानम् (काव्यसङ्ग्रहः, १९८९), लहरीदशकम् (१९९१), गीतधीवरम् (१९९६), सम्प्लवः (२०००), विक्रमादित्यकथा (हिन्दी-उपन्यासः) च उल्लेखनीयाः सन्ति। एतेषां काव्यसङ्ग्रहस्य 'सन्धानम्' कृते एते १९९४ तमे वर्षे साहित्य-अकादमी-पुरस्कारेण सम्मानिताः; तदतिरिक्तं कालिदासपुरस्कारेण (१९९९), बिड़ला-फाउण्डेशन-सम्बद्धेन शङ्करपुरस्कारेण, संस्कृतिमन्त्रालयेन दत्तेन संस्कृतबालसाहित्यपुरस्कारेण (२०२३) च सम्मानिताः सन्ति।संक्षेपेण, आचार्यराधावल्लभत्रिपाठिनः संस्कृत-हिन्दीसाहित्ययोः मध्ये सेतुकार्यं कुर्वतां तेषु विरलेषु साहित्यकारेषु वर्तन्ते, यैः प्राचीना भाषा समकालीनसन्दर्भेषु प्रासङ्गिकी कृता, तेषां सम्पूर्णं कृतित्वं च शोधार्थिनां कृते संस्कृतसाहित्यस्य आधुनिकप्रवृत्तीनां बोधाय विशेषं महत्त्वं धारयति।

"मानवी" इति आचार्यराधावल्लभत्रिपाठिना विरचितः संस्कृतबालोपन्यासः, यः आधुनिकसंस्कृतसाहित्यस्य विशिष्टा कृतिः मन्यते। अस्य उपन्यासस्य विशेषता इयम् अस्ति यत् अत्र मानव-मानवयोः प्रेम्णा सह मानव-पशुपक्षिणां मध्ये वर्तमानं प्रेम अपि अतीव मार्मिकेन संवेदनशीलेन च प्रकारेण चित्रितम्।उपन्यासस्य आरम्भः प्रसिद्धेन पक्षिविशेषज्ञेन सलीम-अली-महोदयेन वृत्तपत्रे हंससमूहस्य आगमनवार्तायाः पठनेन भवति, तदनन्तरं ते विदिशानगरस्य समीपे नन्दनपुरग्रामं प्रति प्रस्थानं कुर्वन्ति। कथायाः केन्द्रीयसूत्रं हंससमूहात् विच्छिन्नायाः हंसिन्याः "मानवी" इत्याख्यायाः ग्रामस्य दशवर्षीयस्य बालकस्य "रघु" इत्याख्यस्य च मध्ये विकसमानं निःस्वार्थं निश्छलं च प्रेम अस्ति। रघुः स्वदारिद्र्येण पारिवारिकसमस्याभिश्च संघर्षं कुर्वन्नपि मानव्याः रक्षणे सर्वदा सजागः तिष्ठति। सः स्वभागस्य दुग्धमपि मानव्यै पाययति, यदा तस्य माता स्वयं स्वपुत्रार्थं दुग्धम् इच्छति। एवं बाल्यकाल एव रघोः हृदये उत्पन्नः अयं निश्छलः प्रेमभावः उपन्यासस्य आत्मा वर्तते। इत्थम् अयम् उपन्यासः मानवीयसम्बन्धानां सम्पूर्णां विविधतां सङ्गृह्य प्रेम्णः अनेकानि रूपाणि प्रकटयति। "मानवी" इति उपन्यासस्य महत्तमा विशेषता इयम् अस्ति यत् अत्र प्रेम्णः परिभाषा मानवीयसीमातः अग्रे गत्वा सम्पूर्णां प्रकृतिं यावत् विस्तारिता। पशुपक्षिणां मानवं प्रति, मानवस्य च पशुपक्षिणः प्रति प्रेम, उभयमपि समानगौरवेण संवेदनशीलतया च प्रस्तुतम्। अयं दृष्टिकोणः भारतीयसंस्कृतेः तस्याः परम्परायाः सह सम्बद्धः, यस्यां सम्पूर्णं चराचरजगत् एकस्याः चेतनायाः अंशः इति मन्यते।भाषादृष्ट्यापि अयम् उपन्यासः

उल्लेखनीयः, यतः अत्र सरला प्रवाहमयी संवादात्मिका च संस्कृतभाषा प्रयुक्ता, या बालपाठकानां कृते सुबोधा भवति, भावनात्मिकां गभीरतामपि जनयति।

साहित्य-अकादेम्या प्रदतबालसाहित्यपुरस्कारः संस्कृतभाषायां बालसाहित्यसर्जनाय दिशां सुदृढं प्रोत्साहनं च प्रदत्तवान् अस्ति । २०१० तमात् वर्षात् २०२३ तमं वर्षं यावत् पञ्चदशवार्षिक्याम् असौ यात्रायां संस्कृतविद्वत्पञ्चतन्त्र-हितपदेशयोः इव प्राचीन नीतिकथापरम्पराम् आधुनिकसन्दर्भेषु पुनर्जीवयद्भि बालकानां कृते सरलं रोचकं संस्कारप्रदं च साहित्यं रचितम्। पद्मशास्त्रित आरभ्य प्रो. राधावल्लभतपाठिपर्यन्तं त्रयोदशानां पुरस्कृतरचनाकाराणाम् इयं शृङ्खला प्रमाणयति यत् संस्कृतं यद्यपि अद्य सीमितवक्तृकी भाषा वर्तते, तथापि अस्याःसर्जनात्मिकी जीवन्तता समकालिकप्रासङ्गिकता च अक्षुण्णा वर्तते।अयं पुरस्कारः न केवलं रचनाकारान् सम्मानयति, अपि तु संस्कृतभाषायाः निरन्तरतायां भाविवंशश्रेणीं यावत् तस्याः हस्तान्तरणे च महत्त्वपूर्णां भूमिकां निर्वहति। तथापि पाठकवर्गस्य सीमितत्वं, प्रकाशनतन्त्रस्य दुर्बलता, डिजिटल-माध्यमेषु अपर्याप्ता उपस्थितिः प्रत्याहुतयश्च इत्यादय अद्यापि विन्द्यमानाः सन्ति, यासां समाधानाय सुनियोजिताः प्रयत्ना आवश्यकाः सन्ति। भविष्ये अस्यां दिशि अधिकस्य शोधस्य आवश्यकता वर्तते, विशेषतः एतासां कृतीनां भाषाशैल्याः, विषयवस्तुनः, शैक्षिकमूल्यानां च गभीरस्य तुलनात्मकस्य क्षेत्रीयस्य च अध्ययनार्थम्, येन संस्कृतबालसाहित्यस्य इयं समृद्धा परम्परा अधकं सुदृढा व्यापिका च भवितुम् अर्हति।

**सन्दर्भ :**

1.संक्षेपपंचतन्त्रम् : आचार्य पद्मशास्त्री, रचना प्रकाशन, जयपुर, 2005 ई.

2.ईसप्कथानिकुञ्जम्, ओम्प्रकाशठाकुर , सुरभि प्रकाशन, दिल्ली , 2007

3.कौमारम् (शिशुगीतसंग्रह) ,अभिराजराजेन्द्र मिश्र, राष्ट्रीय संस्कृत संस्थानम्, नवदेहली 2008 ई.

4.अभिनवपंचतन्त्रम्, प्रो. राजेन्द्र मिश्र, वैजयन्त प्रकाशन, इलाहबाद, जनवरी 2009 ई.

5.मार्जालस्य मुखं दृष्टम् : डॉ. विश्वास, संस्कृत भारती, नव देहली, 2011 ई.

6.बालकथासप्तति, प्रो. जनार्दन हेगड़े, संस्कृतभारती, बेंगलूरु, 2013

7.चमत्कारिकःचलदूरभाषः ऋषिराज जानी, पार्श्व पब्लिकेशन, अहमदाबाद, 2013 ई.

8.डयते कथमाकाशे : डॉ. राजकुमार मिश्र, मान्यता प्रकाशन, नई दिल्ली, 2015 ई.

9.कपिः कूर्दते शाखायाम् ऋषिराज जानी, खुश्बू प्रकाशन, अहमदाबाद, सन 2016

10.शनैः शनैः (बालगीतावलि) डॉ. सम्पदानन्द मिश्र,औरो पब्लिकेशन , श्री अरविंद सोसाइटी,पुदुच्चेरी,2016 ई.

11.संस्कृतकथाशतकम्, पद्मशास्त्री, रचना प्रकाशन, जयपुर,2018

12.बालगुंजनम् : डॉ. अरविन्द कुमार तिवारी, एजुकेशनल बुक सर्विस, नई दिल्ली 2018

13.चित्वा तृणं तृणम् : डॉ. संजय कुमार चौबे, प्रगतिशील प्रकाशन, नई दिल्ली, 2018

14.सचित्रप्रहेलिकाशतकम् : प्रो.कुलदीप शर्मा , आईडियल पब्लिकेशन,जयपुर,2018

15.कथामाधुरी : आशा अग्रवाल,औरो पब्लिकेशन , श्री अरविंद सोसाइटी,पुदुच्चेरी,2019

16.मानवी संस्कृते बालोपन्यासः राधावल्लभ त्रिपाठी, शिवालिक प्रकाशन, दिल्ली 2021

17.संस्कृत साहित्य का अभिनव इतिहास- डॉ राधावल्लभ त्रिपाठी विश्वविद्यालय प्रकाशन, वाराणसी 2001

18.संस्कृत साहित्य का इतिहास : डॉ. ए.बी. कीथ, मोतीलाल बनारसीदास, दिल्ली, 2002

19.संस्कृत साहित्य का इतिहास वाचस्पति गैरोला, चौखम्बा विद्या भवन, वाराणसी, 2003

20.संस्कृत साहित्य का इतिहास (लौकिक खण्ड) : डॉ. प्रीतिप्रभा गोयल, राजस्थानी ग्रन्थ सभागार, जोधपुर, 2006

**वेबसाइट्**

1. Sahitya-akademi.gov.in

2. www.sanskritacademi. delhi.gov.in

3. https://sanskritbhasi.blogspot.com

4. https://sanskritabalasahityaparishad.org